शब्द–ब्रह्म
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
E ISSN 2320 – 0871
17 अक्टूबर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

# कतिपयानां संस्कृतशब्दानां प्रयोगविमर्शः

डॉ. जयकृष्णः
व्याकरण - प्राध्यापकः
राष्ट्रिय - संस्कृत - संस्थानम्, वेदव्यास परिसरः, बलाहरः
कांगडा, हिमाचलप्रदेशः, भारतम् - 177108

**शोधस्य संक्षेपः**

*अतिविशालं संस्कृतस्य वाङ्मयम्। अस्मिन् वाङ्मये प्रायः सर्वाः अपि विद्याउपनिबद्धाः वर्तन्ते। तत्रापि विशिष्य वैदिकं यत् वाङ्मयं वर्तते तस्मिन् भूतस्य भविष्यतः च सर्वासां विद्यानां समावेशः अस्ति। आसां विद्यानां ज्ञानाय येषु शब्देषु इमाः विद्याः उपनिबद्धाः सन्ति तेषां शब्दानां ज्ञानं नितान्तम् अपेक्षितं भवति। शब्दस्य ज्ञानाय च तद्भाषागतः अनवरतः कश्चन व्यवहारः अपेक्षितः भवति। संस्कृते तावत् भाषायाः ज्ञानस्य समर्जनात् परम् अपि बहूनां शब्दानां वास्तविकम् अर्थरहस्यं सङ्गतिः वा व्याकरणात् विना न सम्भवति। शब्दानां प्रयोगस्य समये कदाचित् भ्रमवशात् अज्ञानस्य वशात् वा भाषायाः स्वरूपं विकृततां प्राप्तुम् आरभते। तादृशायाः विकृतेः भाषां संरक्षितुम् व्याकरणम् अस्मान् उपकरोति। यस्याः च भाषायाः व्याकरणं न तावत् सुदृढं भवति सा भाषा तावत् वैकृतिम् अवाप्य नूतनम् एव स्वरूपं गृह्णाति। ग्रीक्लैटिन्-इत्यादिभिः भाषाभिः विकृतिं अवाप्ताः आङ्ग्लादयः भाषाः तत्र प्रमाणं सन्ति एव। परन्तु संस्कृतस्य पाणिनीयं व्याकरणं तावत् अतीव सुदृढं वैज्ञानिकं च वर्तते येन अस्यां भाषायां विकृतेः अवसर एव अद्यावधि न उत्पन्नः। परन्तु अस्माकम् अनवधानस्य वशात् जातुचित् शब्दप्रयोगे भ्रमः जायते। यथा सायंकाले इति प्रयोक्तव्यम् अथवा सायकाले इति? गमितः इति प्रयोक्तव्यम् अथवा गामयित? चतुष्टयम् इति प्रयोक्तव्यम् अथवा चतुष्ट्वम्? इष्टका इति प्रयोक्तव्यम् अथवा इष्टिका? क्रीडालुः इति प्रयोक्तव्यम् अथवा क्रीडकः इति वा? अस्मिन् लेखे ताअवत् एतादृशानाम् एव कतिपयानां संस्कृतप्रयोगाणां विमर्शः कृतः वर्तते।*

मुख्य शब्द : *सायकाले, गमितः, चतुष्ट्वम्, इष्टका, क्रीडकः।*

## प्रस्तावना

शब्दस्य वास्तविकात् ज्ञानात् ऋते भाषायाः स्वरूपम् अपभ्रंशतां प्राप्नोति। या श्रूयमाणा भाषमाणा च भाषा सुदृढस्य व्याकरणस्य आश्रयं न प्राप्नोति तस्याः भाषायाः स्वरूपं चिरं अक्षुण्णतया न तिष्ठति। संस्कृतभाषायाः तावत् इदं वैशिष्ट्यं यत् अस्याः भाषायाः स्वरूपं सृष्टेः आरम्भकालाद् एव अक्षुण्णतया तिष्ठति। तत्र अस्याः भाषायाः समग्रतां प्राप्तवत् व्याकरणं कारणं परमम्। तत्रापि पाणिनीयस्य व्याकरणस्य अनितरसाधारणत्वं जानाति समग्रं प्रपञ्चं प्रत्यक्षतय परोक्षतया वा। एतस्य परिणामः अयं यत् अक्षुण्णत्वे सत्यपि संस्कृतेन असङ्ख्याकानां नूतनानां शब्दानां निर्माणम् अर्हति भवितुम्। येषां च शब्दानाम् अस्माकं भ्रमवशात् अशुद्धः प्रयोगः जायते तेषां शब्दानां नियमनं व्याकरणेन क्रियते। परन्तु एतादृशाय नियमनाय व्याकरणस्य ईषद् वा सञ्ज्ञानम् अस्माभिः कर्तव्यम् एव भवति। अस्मिन् शोधप्रबन्धे वयं काँश्चन तादृशान् एव शब्दान् पश्यामः येषां प्रयोगसमये प्रयोक्तॄणां सामान्यतया भ्रमः जायते। अथवा प्रयोक्तारः स्वयं भ्रमिताः न भवन्ति चेदपि अधीतव्याकरणविद्यः तान् श्रुत्वा विप्रतिपत्तिमान् जायते।

**शोध प्रकृति** - प्रकृतं शोधपत्रं विमर्शात्मकम् अस्ति। अस्मिन् शोधप्रबन्धे ये शब्दाः तावत् विमर्शनाय स्वीकृताः ते लेखकेन पाठनसमये छात्राणां, प्रयोगसमये प्रयोक्तृणां पिपृच्छिषूणां च सकाशात् सङ्कलिताः सन्ति।

**शोध उद्देश्यम** - अस्य प्रबन्धस्य प्रधानम् उद्देश्यम् इदम् एव अस्ति यत् येषु प्रयोगेषु प्रयोक्तृणां भ्रमस्य वशात् अपभ्रंशाः प्रयोगाः संस्कृतस्य मिथ्या स्वरूपं गृहीत्वा लोके प्रसरन्तः सन्ति तेषाम् अवरोधः स्यात्। शुद्धाः प्रयोगाः एव व्यवहारे रूढाः स्युः येन संस्कृतायाः वाचः अक्षुण्णत्वं अखण्डतया प्रसरेत्।

अनेन शोधपत्रेण अस्मिन् शोधपत्रे ये शब्दाः विमृष्टाः तेषां साधुत्वस्य असाधुत्वस्य च निर्णयः भविष्यति। पाठकानां कृते मया कृते विमर्शे विमर्शान्तरं कर्तुम् अपि अनेन अवसरः प्राप्तः भविष्यति।

शोधपत्रस्य अस्य लेखकेन एतादृशं शब्दसाधुत्वपरकं कार्यं विद्यावारिधिः इति उपाधेः अर्जनाय पूर्वं 'चक्रपाणिविजयम्' इति भट्टलक्ष्मीधरस्य महाकाव्यम् आदाय अपि कृतं वर्तते। विद्यावारिधिप्रबन्धश्च अयं शब्दपरिशीलनपरकः विश्वविद्यालयानुदानायोगेन अनुमतं सम्मानितं च वर्तते। पत्रिकान्तरेषु अपि एतादृशः नैकशब्दसाधुत्वस्य विचारः निष्पादितः अस्ति लेखकेन।

## कतिपयानां संस्कृतशब्दानां प्रयोगविमर्शः

**सायंकाले आहोस्वित् सायकाले?**

'अहं सायङ्काले न्यूनं खादामि' इत्यस्य वाक्यस्य स्थाने 'अहं सायकाले न्यूनं खादामि' इत्यस्य वाक्यस्य प्रयोगः अपि कर्तुं शक्यते। उभयोः वाक्ययोः सायङ्काले - सायकाले इति द्वयोः पदयोः कश्चन व्यत्यासः दृश्यते। अत्र प्रथमे पदे तावत् सायम् इत्यस्य मकारान्तस्य अव्ययस्य प्रयोगः दृश्यते। द्वितीये पदे तु तथा न लक्ष्यते। तत्र साय इति शब्द एव पूर्वपदत्वेन उपात्तः इति पदविग्रहेण ज्ञायते। ननु अत्र प्रथमं सायम् इति अव्ययेन युक्तं रूपम् अविप्रतिपत्तिकरम् एव अस्ति। यतः स्वरादिगणे [1] सायम् इति अव्ययं दिवसस्य अवसानार्थे प्रयुक्तं वर्तते। तस्य मान्तस्य अव्ययशब्दस्य समर्थेन कालशब्देन समासद्वारा परिनिष्ठितं रूपं सायङ्काल इति लभ्यते। परन्तु स्वरादिगणे तावत् मान्तमेव सायम् इति अव्ययं दृश्यते। साय इति अकारान्तस्य पाठः तत्र न दृश्यते। एवं तर्हि सायकाल इति प्रयोगः साधुत्वं न भजेत इति संशयावसरः अत्र उदेति। अत्र उच्यते - अयं प्रयोगः अपि साधुः एव। अस्य साधुत्वे का युक्तिः इति चेत् **सायंचिरम्प्राह्णेप्रगेव्ययेभ्यष्ट्युट्युलौ तुट् च** [2] इति सूत्रस्य प्रथमवार्तिकावतरणस्य भाष्ये **'अथ सायचिरयोः किं निपात्यते'** इत्युक्तम्। किञ्च अत्रैव वार्तिके अपि **'सायचिरयोः मकारान्तत्वं प्रत्ययसंनियुक्तम्** [3]'। एवञ्च अनयोः भाष्यवार्तिकयोः पाठेन अयं विषयः स्पष्टः भवति यत् मान्तात् भिन्नः अपि अस्ति कश्चन शब्दः साय इति। अर्थस्तु अस्य दिवसावसाने अपि भवति इति केचन आमनन्ति। तत्र कैश्चित् एषा युक्तिः प्रतिपाद्यते यत् सायम् इति स्वरादिगणे पठितत्वात् अव्ययं स्वतः एव सिद्धं ननु अतः अव्ययत्वेन एव सिद्धे पुनः सायम् इति अव्ययभूतः शब्दः पुनः सूत्रे व्यर्थः स्यात्। व्यर्थः सन् अयं ज्ञापयति यत् अव्ययात् भिन्नः अपि कश्चन शब्दः अस्ति साय इति सायम् इत्यस्मिन् अर्थे। एतादृशि प्रतिपादने उक्तं भाष्यं वार्तिकं च अपि प्रमाणं भवति। किञ्च प्रकृतसत्रे एव भाष्ये तावत् **'सायमोऽह्ने मलोपः'** इति प्रत्याक्षेपसमाधानभाष्ये **'कथं सायम् साये** इत्यस्य समाधाने **'वा सप्तम्यामिति वक्तव्यम्** [4]'

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 अक्टूबर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

इत्युक्तम्। नाम सप्तम्यां सायमः मलोपः विकल्पेन वक्तव्यः इत्यर्थः। तथा चेत् सप्तम्यां परतः एव अकारान्तत्वम् साय इत्यस्य स्यादिति चेत् समासस्थले सायमः सप्तम्यन्तत्वं परिकल्प्य उक्तभाष्यरीत्या सायशब्दः उपपादनीयः। अनया एव युक्त्या च **'सायाह्न'** इति शब्दस्य अपि सिद्धिः भवति। एवञ्च 'सायकाले न्यूनं खादामि' इत्यादीनां प्रयोगाणाम् अपि सिद्धिः जायते।

**गमितः** उत **गमयितः?**

'पिता पुत्रं ग्रामं गमयति' इत्यस्य वाक्यस्य कर्त्रर्थे भूत-क्तप्रत्ययान्तत्वेन प्रयोगसमये प्रयोक्तारः प्रायशः प्रक्रियायाः अस्मरणात् संशयं कुर्वन्ति। 'पित्रा पुत्रः ग्रामं गमयितः' इति स्यात् अथवा 'पित्रा पुत्रः ग्रामं गमितः' इति स्यात् ? इति जिज्ञासा जायते। अत्र कथयामः - गमयति इति क्रियापदं गम् इति धातोः प्रेरणार्थे णिच् प्रत्ययान्तम् अस्ति। अतः णिजन्तस्य गम् इति धातोः कर्तुः अर्थे क्तप्रत्ययान्तं रूपं गमितः इत्येव साधु। यतः अत्र गम् इति धातोः प्रेरणार्थे णिच् प्रत्यये [5] सनाद्यन्तत्वात् धातुसञ्ज्ञायाम् [6] अनेकाचः निष्पन्नस्य धातोः अस्य इडागमः [7] भवति वलादौ क्तप्रत्यये परे। ततः गम् + इ (णिच्) + इ (इट्) + त इत्यवस्थायां इटा सहिते निष्ठासञ्ज्ञके क्तप्रत्यये परे णिचः लोपः[8] भवति। ततः गमितः इति एव रूपं लभ्यते। अनेन अनुशासनेन ज्ञायते यत् गमयितः इति णिजन्तः प्रयोगः असाधुः भवति। गमितः इत्येव साधुः। एवं प्रकारेषु अन्येषु अपि णिजन्तेषु प्रयोगेषु निष्ठायां णिचः लोपस्य व्यवस्था ज्ञातव्या भवति।

**चतुष्टयम्** अथवा **चतुष्ट्वम्?**

'इदं दर्शनं प्रमाणचतुष्टयं कथयति' इत्यस्य वाक्यस्य स्थाने 'इदं दर्शनं प्रमाणचतुष्ट्वं कथयति' इत्यस्य वाक्यस्य प्रयोगः किम् अर्हेत् भवितुम् इति जातुचित् केनचन जिज्ञासुना जिज्ञासा कृता। प्रकृतयोः वाक्ययोः चतुष्टयम् अपि च चतुष्ट्वम् इति शब्दद्वये कश्चन व्यत्यासः दृश्यते। कः असौ व्यत्यासः इति चेत् प्रथमे चतुष्ट्यम् इति पदे अवयवे अर्थे वर्तमानात् प्रथमासमर्थात् चतुर् इति सङ्ख्यावाचिनः शब्दात् षष्ठ्याः अर्थे तयप् [9] इति प्रत्ययः विहितः अस्ति। अतः चत्वारः अवयवाः अस्य इति चतुष्टयम् इति शब्दस्य अर्थः भवति। प्रमाणानां चतुष्टयम् इत्येवं विग्रहे षष्ठीसमासस्य द्वारा प्रमाणचतुष्ट्यम् इति रूपं सिद्ध्यति। परन्तु प्रमाणचतुष्ट्वम् इति प्रयोगे तु तयपः प्रत्ययस्य श्रवणं न भासते। किं तर्हि अयं प्रयोगः युज्येत? इति जिज्ञासा ज्ञायते। अत्रोच्यते - चतुष्ट्वम् इति प्रयोगः तयपा प्रत्ययेन तु न लभ्यते परन्तु षष्ठीसमर्थात् चतुर् इति प्रातिपादिकात् भावः इत्यस्मिन् अर्थे त्वप्रत्ययेन[10] चतुष्ट्वम् इति रूपं प्राप्यते। तथा चेत् चतुर्णां भावः चतुष्ट्वम् इति अर्थे रूपं प्रसूतं भवति। एतादृशे अर्थे प्रमाणानां चतुष्ट्वम् इत्येवं विगृह्य समासः कर्तव्यः भवेत्। षष्ठीसमासे अत्र समाससङ्गतिः तु विचारणीया स्यात्। षष्ठीसमासस्य द्वारा यदि अपेक्षितस्य अर्थस्य लाभः न जायते तर्हि समासान्तरं वा अत्र विभावनीयम्। भवतु नाम समाससंशयः। परन्तु वाङ्मये तु त्वप्रत्ययान्तं चतुष्ट्वम् इति रूपं दृश्यते। तथाहि न्यायसूत्रमस्ति - **'न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्'**[11] इति। एवञ्च ईषद् अर्थस्य भेदे वा प्रयुक्तं स्यात् परन्तु चतुष्ट्वम् इति पदस्य अस्तित्वं तु न नास्ति।

**इष्टका** आहोस्वित् **इष्टिका?**

'इष्टकाभिः गृहस्य निर्माणं भवति' इति वाक्यस्य स्थाने प्रायशः 'इष्टकाभिः गृहस्य निर्माणं भवति इति वाक्यं श्रूयते। तन्नाम अनयोः वाक्ययोः इष्टका अपि च इष्टिका इति द्वयोः पदयोः

E ISSN 2320 – 0871
17 अक्टूबर 2018

कश्चन व्यत्यासः दृश्यते। प्रथमे पदे इकारः श्रूयते अपरस्मिन् पदे इकारः न श्रूयते। कतरः अनयोः साधुः प्रयोगः अथवा अस्ति उभयोः अपि प्रयोगयोः साधुत्वम् इति जिज्ञासा जायते। अत्र कथयामः - इष् इति धातोः तकन्[12] इति प्रत्ययः भवति। ष्टुत्वादि सन्धिकार्यं कृत्वा इष्टक इति शब्दः जायते। ततः अदन्तत्वात् टाप्[13] कृत्वा इष्टका इति रूपं लभामहे। ननु अत्र तकन् इति प्रत्ययस्य ककारात् पूर्वं विद्यमानस्य तकारात् उत्तरवर्तिनः अकारस्य इकारादेशः[14] प्राप्नोति। तथा सति इष्टिका इत्येव रूपं स्यात् न तु इष्टका। परन्तु प्रयोगस्तु इष्टका इत्यपि दृश्यते वाङ्मये। कथं तर्हि इष्टका इत्यस्य सिद्धिः स्यात् इति विचार्यते। अत्र विपश्चिद्भिः प्रतिपाद्यते यत् 'इष्टकेषीकामालानां चिततूलभारिषु[15]' इति सूत्रकारस्य वचने इष्टकाशब्दस्य निपातनात् इत्वं न भवति। यद्यत्र इत्वम् इष्टं स्यात् तर्हि इत्वरहितस्य इष्टका इति शब्दस्य सूत्रे निपातनम् एव न कुर्यात् सूत्रकारः। तत्त्वबोधिनीकारस्तु 'केचित् तु प्रत्ययस्थात् इति इत्वम् इह भवति अनित्यत्वात्। तज्ज्ञापकं मृदस्तिकन् इति इकारोच्चारणम् इत्याहुः[16]' इति पक्षान्तरम् अपि केषाञ्चन मते उपस्थापयति। अतः इष्टका इति रूपं सिद्धं भवति। ननु इष्टिका इति रूपम् अपि क्वचित् श्रूयते। 'इष्टिकां विना मृत्तिकां विना रचयेम संस्कृतभवनम्' इति आधुनिकं गीतम् अपि श्रूयते। शब्दकल्पद्रुमकारः अपि गृहादिनिर्माणार्थदग्धमृत्तिकाखण्डः इत्यस्मिन् अर्थे इष्टका इष्टिका[17] इति रूपद्वयम् लिखति। परन्तु उक्तरीत्या निपातनादिना एव अयम् अपि केवलम् इष्टका इति शब्दस्य एव व्युत्पादनम् अदर्शत्। इष्टिका इत्यस्य शब्दस्य इत्वविषये चर्चा अमुना न कृता। तत्र उदाहरणम् अपि 'कूपोदकं वटच्छाया श्यामा स्त्री इष्टकालयम्' इति चाणक्यस्य उदाहृतम्। इत्वसहितस्य उदाहरणं तु न दृश्यते शब्दकल्पद्रुमे। यदि प्रयोगस्य अस्य शिष्टैः व्यवहारः कृतः स्यात् तर्हि तु इत्वविधानस्य इकारश्रवणस्य वा अनेकः उपायः कर्तुं शक्यते। तथापि लोके कथञ्चित् श्रूयमाणत्वात् कोषादिषु च लिखितत्वात् केचन प्रयासाः अत्र इष्टिका इति शब्दस्य निर्माणार्थं क्रियन्ते। तत्राद्यः प्रयासः यत् तत्त्वबोधिन्यनुसारं पक्षान्तरप्रतिपादनस्य प्रकारे **'मृदस्तिकन्[18]'** इति यत् ज्ञापकं प्रदर्शितं तत् ज्ञापकं **'ज्ञापकसिद्धं न सर्वत्र[19]'** इत्यनया परिभाषया शिथिलीकृत्य प्रत्ययस्थात् इत्यादिना इत्वं शक्यं विधातुम्। परन्तु एवं कर्तव्ये इष्टकेषीत्यादिसूत्रे निपातनस्य अनित्यत्वं तु चिन्तनीयं स्यात्। अपरः प्रकारः अयं यत् उक्तेन उणादि 'इष्यशिभ्यां तकन्' इत्यनेन सूत्रेण निर्दिष्टाभ्यां शब्दाभ्याम् एव तकन् विधीयते परन्तु तस्य तकनः आवश्यकता मस्यतेः अपि धातोः भवति मस्तकम् इत्यादीनां रूपाणां साधनाय। तत्र तकनः विधानाय उणादीनां बहुलत्वेन प्रवृत्त्या निर्वाहः यथा क्रियते तथैव इषेः धातोः तिकनः[20] विधानं बहुलत्वेन यदि क्रियेत तर्हि इष्टिका इत्यस्य रूपस्य साधनं भवितुम् अर्हति। तत्र यद्यपि वृतु इति वर्तनार्थात् धातोः तिकन् विहितः। परन्तु क्वचित् प्रवृत्तिः इति बहुलार्थस्य द्वारा इषेरपि तिकनि इष्टिका इत्यस्य सिद्धिः भवितुम् अर्हति। एवं व्युत्पादिते इत्वं विधेयम् अथवा न इत्यपि संशयः न तिष्ठेत्। अत्र प्रदर्शितयोः द्वितीयः प्रकारः विवादरहितः भासते। तथापि अस्मिन् अपि प्रकारे कियद् औचित्यम् इत्यत्र विद्वांसः एव प्रमाणम्।

**क्रीडालुः उत क्रीडकः?**

'क्रीडालुः क्रीडाङ्गणं गच्छति', 'क्रीडालवः क्रीडायै सिद्धाः सन्ति', 'क्रीडालूनाम् उत्साहवर्धनाय पुरस्काराः दीयन्ते' इति एतादृशः बहवः प्रयोगाः

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 अक्टूबर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

क्रीडालु इति शब्दयुक्ताः संस्कृतस्य सभासु अपि श्रूयन्ते। किं क्रीडालु इति शब्दः अपि संस्कृतवाङ्मये रूढः अस्ति वा इति संशयः जायते। यद्यपि दयालुः, निद्रालुः, तन्द्रालुः इत्यादीनां शब्दानाम् इव क्रीडालुः इत्यपि शब्दः स्यात् इति प्रयोक्तारः मनसि विनिश्चित्य शब्दस्य अस्य प्रयोगं कुर्वन्ति तथापि अयं शब्दः किं साधुत्वं भजते अथवा न इति विमर्शस्य आवश्यकता अस्ति। एवंविधेषु शब्देषु यः प्रत्ययः श्रूयते सः आलुच् इति अस्ति। अयम् आलुच्[21] प्रत्ययः सूत्रकारेण **स्पृह् गृह् पत्, दय्, द्रा, धा** इत्येतेभ्यः धातुभ्यः एव विहितः। एषु धातुषु तावत् क्रीड् इति धातुः न अन्तर्भवति। अतः क्रीडालुः इति रूपं न स्यात् इति पाणिनिवर्यः इङ्गितं करोति। यद्यपि हृदयालुः, शीतालुः, उष्णालुः, तृप्रालुः इत्यादयः प्रयोगाः उदाहृताः दृश्यन्ते महाभाष्ये परन्तु एतेषु प्रत्ययेषु सूत्रोक्तः आलुच् इति प्रत्ययः नास्ति अपितु भाष्यवार्तिकोक्तः क्रमशः आलुः आलुच्च इति प्रत्ययः अस्ति। एतौ च प्रत्ययौ 'हृदयाच्चालुरन्यतरस्याम्' इत्यनेन 'शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः' इत्याभ्यां वार्तिकाभ्यां[22] विधीयेते। अत्र वार्तिकद्वये अपि क्रीडधातोः अन्तर्भावः नास्ति। वस्तुतः आलुजन्तः क्रीडालुः इति प्रयोगः यदि वाङ्मये प्रसिद्ध्या रूढः अभविष्यत् तर्हि सूत्रकारः अवश्यं तस्य निर्देशं करोति स्म भाष्यकारो वा। परन्तु निर्देशः न दृश्यते। एवं तर्हि क्रीडालुः इति प्रयोगस्य अपेक्षया क्रीडकः इति प्रयोगः शास्त्रसम्मतः भासते। क्रीड् इति धातोः कर्तरि ण्वुलि[23] क्रीडक इति प्रयोगः दुर्वारः अपेक्षितार्थस्य पूरकश्च भवति। यदि च क्रीडालुः इति प्रयोगः शिष्टैः प्रयुक्तः वाङ्मये दृश्येत तर्हि उक्तसूत्रस्य योगविभागस्य द्वारा इष्टसिद्धिः कर्तुं शक्या स्यात्। प्रयोगाभावे तु क्रीडक इत्येव वरं स्यात् इति चिन्त्यते अस्माभिः।

## निष्कर्ष

प्रयुक्तानां हि शब्दानाम् अन्वाख्यातृ भवति व्याकरणम्। ये तावत् शब्दाः सन्ति व्यवहृताः नित्याः अनादिकालतः परिनिष्ठिताः वाङ्मये तेषाम् एव व्यवस्थापकं व्याकरणम्। अत एव असाधुभ्यः शब्देभ्यः साधुशब्दाः व्युत्पाद्य पृथक् क्रियन्ते येन तद् व्याकरणं महीयते सर्वत्र। महान्तो हि अतीन्द्रियाणाम् असंवेद्यानां विषयाणां ज्ञातारः अस्माकं अनुपप्लुतचेतसः महर्षयः योगबलेन वेदोदधेः उद्धृत्य व्याकरणागमस्य माध्यमेन शब्दस्य वास्तिकं परिचयम् अचीकरन् इति नो न न सौभाग्यम्। काचिदपि संस्कृतिः चिरं लोके तिष्ठति तस्याः भाषायाः संरक्षणेन। यतः भाषा परिचायिका भवति राष्ट्रास्तित्वस्य। अस्माकं संस्कृतस्य ज्ञानं तावत् न केवलं भाषाया एव नियामकम् अपितु सकलोकोपकारिणः वेदस्य अर्थावबोधने अपि कारणम् अस्ति। अतः तादृशसंस्कृतप्रयोगस्य राशिः यथापूर्वम् अक्षुण्णरूपेण तिष्ठतु इति अस्मिन् क्षेत्रे सन्ति आवश्यकता महतां प्रयासानाम्। तादृश एव प्रयासः अत्र लेखे केषाञ्चन शब्दानां साधुत्वम् असाधुत्वं च आदाय विहितः। मन्ये शब्दोपासकाः शब्दचुञ्चवः अनेन प्रयासेन लाभान्विता भविष्यन्ति विदुषां चैतत् मोदाय भविष्यति। ते च विद्वांसः नूनमेव इह अपेक्षितान् परिष्कारान् सूचयिष्यन्तीति आशासे।

## सन्दर्भ ग्रन्थ

*1 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 19, सूत्रसंख्या - 1.1.33*

शब्द-ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका
17 अक्टूबर 2018
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

2 भार्गव शास्त्री (परिष्कर्ता), महाभाष्यम्, (प्रथम संस्करण) 1988, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पृष्ठ संख्या - 200, चतुर्थ खण्ड सूत्रसंख्या - 4.3.23

3 भार्गव शास्त्री (परिष्कर्ता), महाभाष्यम्, (प्रथम संस्करण) 1988, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पृष्ठ संख्या - 200, चतुर्थ खण्ड, वार्तिकसंख्या - 5457

4 भार्गव शास्त्री (परिष्कर्ता), महाभाष्यम्, (प्रथम संस्करण) 1988, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पृष्ठ संख्या - 201, चतुर्थ खण्ड

5 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 289, सूत्रसंख्या - 3.1.26

6 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 291, सूत्रसंख्या - 3.1.32

7 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 410, सूत्रसंख्या - 7.2.35

8 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 288, सूत्रसंख्या - 6.4.52

9 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - 354, सूत्रसंख्या - 5.2.42

10 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - 327, सूत्रसंख्या - 5.1.118

11 नारायणमिश्रः (सम्पादकः), न्यायदर्शनम्, (सप्तम संस्करण) 2012, चौखम्बा संस्कृत भवन, वाराणसी, पृष्ठ संख्या - 227, सूत्रसंख्या - 2.2.1

12 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी, (पंचम संस्करण) 2010, मोतीलाल बनारसीदास, वाराणसी, चतुर्थ भाग, पृष्ठ संख्या - 242, उणादिसूत्रसंख्या - 428

13 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - 2, सूत्रसंख्या - 4.1.4

14 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 465, सूत्रसंख्या - 7.3.44

15 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - 232, सूत्रसंख्या - 6.3.64

16 गिरिधरशर्मा (सम्पादकः), तत्त्वबोधिनी, (पंचम संस्करण) 2010, मोतीलाल बनारसीदास, वाराणसी, चतुर्थ भाग, पृष्ठ संख्या - 242

17 राधाकान्तदेव बहादुरः (रचयिता), शब्दकल्पद्रुमः (तृतीय संस्करण) 1967, चौखम्बा संस्कृत सिरिज़ ओफिस, वाराणसी, प्रथम भाग, पृष्ठ संख्या - 214

18 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - 468, सूत्रसंख्या - 5.4.39

19 विश्वनाथ मिश्रः (व्याख्याता), परिभाषेन्दुशेखरः (द्वितीय संस्करण) 2010, चौखम्बा सुरभारती प्रकाशन, वाराणसी, तृतीय भाग, पृष्ठ संख्या - 451

20 गिरिधरशर्मा (सम्पादकः), वैयाकरणसिद्धान्तकौमुदी (पंचम संस्करण) 2010, मोतीलाल बनारसीदास, वाराणसी, चतुर्थ भाग, पृष्ठ संख्या - 242, उणादिसूत्रसंख्या - 427

21 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 407, सूत्रसंख्या - 3.2.158

22 भार्गव शास्त्री (परिष्कर्ता), महाभाष्यम्, (प्रथम संस्करण) 1988, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पृष्ठ संख्या - 356, चतुर्थ खण्ड, वार्तिकसंख्या - 5785/5786

23 ब्रह्मदत्त जिज्ञासु (व्याख्याता), अष्टाध्यायी प्रथमावृत्ति (नवम संस्करण) 2005, रामलाल कपूर ट्रस्ट, रेवली - सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - 336, सूत्रसंख्या - 3.1.133